The volumes of this Series may be had, in America, by addressing Messrs. Ginn and Company, at New York or Chicago or San Francisco, or at the home-office, 29 Beacon Street, Boston, Mass.; in England, by addressing Messrs. Ginn and Company, 9 St. Martin's Street, Leicester Square, London, W.C.; and in Continental Europe, by addressing Mr. Otto Harrassowitz, Leipzig.—For the titles and descriptions and prices, see the List at the end of this volume.

891.2
P191 H

179950

PRINTED FROM TYPE IN 1913 AT THE
ORIENTAL PRINTING OFFICE OF
G. KREYSING
LEIPZIG, SAXONY, GERMANY

*First Edition, issued in 1915*
*Twelve Hundred and Fifty Copies*

# CONTENTS

PAGE

PREFATORY AND RELATED MATTER

**Preface: by the Editor of this Series**

The titles Panchatantra and Tantrākhyāyika . . . . . . . ix
Importance of the Panchatantra in the history of literature . . . ix
Its place of origin, author, date, and purpose . . . . . . . ix
Earliest and latest time-limits of the work, 300 B.C. and 570 A.D. . . x
Hertel's essays and books on the Panchatantra . . . . . . . xi
The missing Introduction and Notes to the present volume . . . xii
Acknowledgments: to the Printing-house of G. Kreysing of Leipzig . xii
To the Royal Society of Sciences at Göttingen . . . . . . xiii

**Typographical devices etc. explained**

Head-lines, page-numbers, line-numbers . . . . . . . . xiv
Indication of emboxments by vertical wavy lines . . . . . . xiv
Vertical straight black-faced lines . . . . . . . . . . xv
Device for citing whole paragraphs of the frame-stories . . . . xv
Citation of tales and stanzas . . . . . . . . . . . xv

SANSKRIT TEXT OF THE TANTRĀKHYĀYIKA OR
The Panchatantra in its oldest extant form, the Kashmirian . . 1 to 143

**Introduction or Kathāmukha**

King Amaraśakti and his three simple sons . . . . . . . 1
The king entrusts the princes to the wise teacher Vishṇuśarman . . 1
The octogenarian master composes for them Five Tantras or Panchatantra 2

**Book I or first Tantra: The estranging of friends**

Frame-story: The lion (Piñgalaka) and the bull (Saṁjīvaka) and
The two jackals, Karaṭaka and Damanaka . . . . . . . . . 3
Tale i: Ape and wedge . . . . . . . . . . . . 5
Frame-story continued . . . . . . . . . . . . . 5
Tale ii: Jackal and drum . . . . . . . . . . . . 11
Frame-story continued . . . . . . . . . . . . . 12
Tale iii a: Monk and swindler . . . . . . . . . . . 14
} Tale iii b: Rams and jackal . . . . . . . . . . 14
Tale iii a concluded . . . . . . . . . . . . . 14
Tale iii c: Cuckold weaver . . . . . . . . . . . 14
Frame-story continued . . . . . . . . . . . . . 17

| | PAGE |
|---|---|
| Tale iv: Crows and serpent | 18 |
| { Tale v: Heron, fishes, and crab | 18 |
| Tale iv concluded | 20 |
| Frame-story continued | 20 |
| Tale vi: Lion and hare | 20 |
| Frame-story continued | 22 |
| Tale vii: Louse and flea | 25 |
| Frame-story continued | 26 |
| Tale viii: Blue jackal | 26 |
| Frame-story continued | 27 |
| Tale ix: Lion's retainers outwit camel | 32 |
| Frame-story continued | 34 |
| Tale x: Strand-bird and sea | 35 |
| { Tale xi: Two geese and tortoise | 36 |
| Tale x continued | 37 |
| { Tale xii: Three fishes | 37 |
| Tale x concluded | 38 |
| Frame-story continued | 39 |
| Tale xiii: Jackal outwits camel and lion | 39 |
| Frame-story continued | 41 |
| Tale xiv: Ape, glow-worm, and officious bird | 45 |
| Frame-story continued | 45 |
| Tale xv: Good-heart and Bad-heart | 46 |
| { Tale xvi: Heron, serpent, and mongoos | 48 |
| Tale xv concluded | 48 |
| Frame-story continued | 49 |
| Tale xvii: How mice ate iron | 50 |
| Frame-story continued and concluded | 51 |

**Book II or second Tantra: The winning of friends**

| | |
|---|---|
| Frame-story: Dove, mouse, crow, tortoise, and deer | 54 |
| Tale i: Mouse and two monks | 62 |
| { Tale ii: Hulled grain for hulled grain | 63 |
| {{ Tale iii: Too greedy jackal | 64 |
| { Tale ii concluded | 65 |
| Tale i concluded | 65 |
| Frame-story continued | 73 |
| Tale iv: Weaver and Stingy and Bountiful | 76 |
| Frame-story continued | 79 |
| Tale v: Deer's former captivity | 84 |
| Frame-story continued and concluded | 87 |

PAGE

**Book III or third Tantra: The war of the crows and the owls**

Frame-story: The war of the crows and the owls . . . . . . . . 90
Tale i: Ass in panther-skin . . . . . . . . . . 96
Frame-story continued . . . . . . . . . . . . . 96
Tale ii: Birds elect a king . . . . . . . . . . 97
{ Tale iii: Elephant and rabbit and moon . . . . . . . 98
Tale ii continued . . . . . . . . . . . . . 100
{ Tale iv: Cat as judge between partridge and hare . . . . . 101
Tale ii concluded . . . . . . . . . . . . . 103
Frame-story continued . . . . . . . . . . . . . 104
Tale v: Brahman, goat, and three rogues . . . . . . . 104
Frame-story continued . . . . . . . . . . . . . 105
Tale vi: Ogre, thief, and Brahman . . . . . . . . . 107
Frame-story continued . . . . . . . . . . . . . 108
Tale vii: King Śivi . . . . . . . . . . . . 108
Frame-story continued . . . . . . . . . . . . . 110
Tale viii: Cuckold wheelwright . . . . . . . . . . 110
Frame-story continued . . . . . . . . . . . . . 111
Tale ix: Mouse-maiden will wed a mouse . . . . . . . 111
Frame-story continued . . . . . . . . . . . . . 113
Tale x: Frogs ride a serpent . . . . . . . . . . 116
Frame-story continued . . . . . . . . . . . . . 117
Tale xi: Goose and fowler . . . . . . . . . . . 121
Frame-story continued and concluded . . . . . . . . . 123

**Book IV or fourth Tantra: The loss of one's gettings**

Frame-story: Ape and crocodile . . . . . . . . . . 124
Tale i: Punished onion-thief . . . . . . . . . . 127
Frame-story continued . . . . . . . . . . . . . 127
Tale ii: Ass without heart and ears . . . . . . . . 128
Frame-story continued and concluded . . . . . . . . . 130

**Book V or fifth Tantra: The fruits of rashness**

Frame-story: Brahman and faithful mongoos . . . . . . . 131
Tale i: Brahman builds air-castles . . . . . . . . . 131
Frame-story continued . . . . . . . . . . . . . 132
Tale ii: The barber who killed the monks . . . . . . . 133

**Appendixes I and II and III and IV**

Appendix I: To book III; text, page 103, line 24
Tale: Treacherous bawd . . . . . . . . . . . . 135

# PREFACE BY THE EDITOR OF THIS SERIES

**The titles of this work, and its importance.** — This volume contains the Sanskrit text of the Tantrākhyāyika or Panchatantra, a collection of ancient Hindu tales in its oldest extant form. Hertel renders *tantra* as 'case-of-good-sense' or 'Klugheitsfall.' The alternative title Panchatantra, 'The five (*pañca*) cases-of-good-sense,' is the one by which the many forms of the work are commonly known in the Occident, and it alludes to the five books into which the work is divided. Hertel translates the title Tantrākhyāyikam as [Manual] 'consisting of tales of cases-of-good-sense,' or, in German, as 'Aus Erzählungen von Klugheitsfällen bestehendes' [Lehrbuch]. In the preface to his volume entitled Das Pañcatantra, page vii, he says:

> This book treats of the history of a work which has made an unparalleled triumphal progress from its native land over all the civilized parts of the globe and which for more than fifteen hundred years has delighted young and old, educated and uneducated, rich and poor, high and low, and still delights them. Even the greatest obstacles — whether of language or customs or religion — have not been able to check that triumphal progress.

The Panchatantra, he adds, is not only the oldest extant work of Hindu artistic fiction, but it is also the one which has exercised a greater influence than any other work of India upon the literature of the world. It was the Panchatantra that formed the basis of the studies of the immortal pioneer in the field of comparative literature, Theodor Benfey. It was his work, entitled Das Pantschatantra, that laid the foundation of the scientific treatment of the history of the fable. From the Panchatantra there came the lost, but famous, Pahlavi translation, among whose effluxes are some of the most notable books of southwestern Asia and of Europe, the Old Syriac Kalilag and Damnag, the Arabic Kalila and Dimna, John of Capua's Directorium vitae humanae, the Buch der Beispiele der alten Weisen, in German of great vigor and beauty, — and so on down to that gem of racy Tudor English, the translation[1] of Doni's La filosophia morale, by Sir Thomas North.

**The Panchatantra: its place of origin, author, date, and purpose.** — Several of the most important of Hertel's conclusions, as set forth in his book, Das Pañcatantra, may here be given, but without detailed references,

[1] Reprinted by Joseph Jacobs: The earliest English version of the fables of Bidpai [Pilpay]. London. 1888.

since the conclusions are easily found, mostly in the second chapter.—The native land of the Tantrākhyāyika was probably Kashmir. Its author was a Vishnuite brahman whose name and date we do not know. It purports to be the work of an octogenarian brahman sage named Vishṇuśarman. It was written in the language of the educated court-circles of the time, the Sanskrit. Its purpose was to train young princes to discreet behavior (klugem Handeln) in private and political life, and, incidentally and by a faultless model, to teach them the court-language, the Sanskrit.

**Earliest and latest time-limits of this work, 300 B.C. and 570 A.D.** —A prior time-limit for the Tantrākhyāyika may be determined by a reference which it makes to Chāṇakya. Its author, at stanza 2, pays homage to six authors of hand-books for princes, among them to "Chāṇakya, the great," whose Artha-śāstra, very recently found and published, was known to the author of our text and used by him. Chāṇakya, otherwise known as Kāutilya or Vishṇugupta, was the prime-minister of the first king of the Mauryan dynasty, king Chandragupta or Σανδράκοττος of Pātaliputra or Παλίβοθρα, 321–297 B.C., at whose court Megasthenes lived as ambassador of Seleukos Nikator. The earliest time-limit for the Tantrākhyāyika would accordingly be about 300 B.C.

The latest time-limit is set by the date of the famous translation of our text into Pahlavi. The celebrated Persian king of the Sassanian dynasty, Chosrau Anōsharwān, 531–579 A.D., commanded his learned physician, Burzuyeh or Burzōe, who knew both the Indian and the Persian tongue, to go to India and get this and other books and translate them into Persian, that is Pahlavi. (See Hertel, page 362.) This command Burzōe executed. The date of the Tantrākhyāyika must accordingly be somewhere between about 300 B.C. and about 570 A.D.

For any precise date, as already intimated, no cogent arguments have as yet been adduced. Certain genuine passages of the Tantrākhyāyika do indeed mention *dīnāra* as coins. Winternitz, following Jolly, assumes that the pronunciation of *dēnāria* or δηνάρια as δινάρια was not earlier than the second century of our era, and that Sanskrit works which mention *dīnāra* can therefore not be earlier than the second century. Hertel accordingly, with perhaps too great caution, thinks that Winternitz and F. W. Thomas may be right in setting the date of the Tantrākhyāyika at about 300 A.D. On the other hand, Keith maintains (JRAS. 1915, page 504) that Indian works with this iotacism need not on that account be later than the beginning of our era. The genealogical tree of the forms and versions of the Indian original shows that the Tantrākhyāyika must have been an old work even at the time of king Chosrau. And we know that its fame had

already reached to distant Persia. Its style and vocabulary moreover show signs of relatively high antiquity. Hertel is of opinion that the Tantrākhyāyika is, as said above, the oldest extant work of Hindu artistic fiction. To this Winternitz (DLZ. 1914, column 2432) demurs.

**Hertel's essays and books on the Panchatantra.** — For the last fifteen years and more, Professor Johannes Hertel has devoted himself with marvellous industry and enthusiasm and success to the study of the narrative literature of India. In particular he has investigated the collection of ancient Hindu tales entitled Panchatantra, — the history of the forms and texts thereof and of their substance. The results of his studies are contained in a multitude of scattered essays and in various independent works, of which works the following should here be mentioned:

Über das Tantrākhyāyika, die Kasmīrische Rezension des Pañcatantra. Mit dem Texte der Handschrift Deccan College VIII. 145. Von Johannes Hertel. [= Band XXII, No. V, der Abhandlungen der philologisch-historischen Klasse der Königl. Sächsischen Gesellschaft der Wissenschaften.] Leipzig. B. G. Teubner. 1904.

Das südliche Pañcatantra. Sanskrittext der Rezension $\beta$ mit den Lesarten der besten Handschriften der Rezension $\alpha$. Herausgegeben von Johannes Hertel. [= Band XXIV, No. V, of the same.] Leipzig. B. G. Teubner. 1906.

The Panchatantra. A collection of ancient Hindu tales, in the recension, called Pañchākhyānaka, and dated 1199 A.D., of the Jaina monk, Pūrṇabhadra. Critically edited in the original Sanskrit by Dr. Johannes Hertel, Oberlehrer am Koeniglichen Realgymnasium, Doebeln, Saxony. [= Volume XI of the Harvard Oriental Series.] Cambridge, Massachusetts. Published by Harvard University. 1908.

The Panchatantra-text of Pūrṇabhadra. Critical introduction and list of variants. By the same. [= Volume XII of the same.] The same. 1912.

The Panchatantra-text of Pūrṇabhadra and its relation to texts of allied recensions as shown in parallel specimens. By the same. [= Volume XIII of the same.] The same. 1912.

Tantrākhyāyika. Die älteste Fassung des Pañcatantra. Aus dem Sanskrit übersetzt mit Einleitung und Anmerkungen von Johannes Hertel. [Two volumes.] Erster Teil. Einleitung. Zweiter Teil. Übersetzung und Anmerkungen. 1909. Leipzig und Berlin. Druck und Verlag von B. G. Teubner.

Tantrākhyāyika. Die älteste Fassung des Pañcatantra. Nach den Handschriften beider Rezensionen zum ersten Male herausgegeben von Johannes Hertel, Oberlehrer am Kgl. Realgymnasium zu Döbeln. Berlin. Weidmannsche Buchhandlung. 1910. [= Abhandlungen der Königlichen Gesellschaft der Wissenschaften zu Göttingen. Phil.-hist. Klasse. Neue Folge. Band XII. No. 2.]

Das Pañcatantra. Seine Geschichte und seine Verbreitung. Von Johannes Hertel. Gekrönte Preisschrift. [Monogram of B.G.T. and the motto "Orient und Occident sind nicht mehr zu trennen."] Verlag von B. G. Teubner in Leipzig und Berlin. 1914.

**The missing Introduction and Notes to the present volume.** — The printing of the text of the Tantrākhyāyika, given on pages 1 to 143 of this volume, volume XIV of the Harvard Oriental Series, was completed September 16, 1913. Professor Hertel had promised to write a brief introduction giving a summary of the history of the Panchatantra. That summary would of course have been a résumé of the volume last cited, Das Pañcatantra, and would everywhere have referred to it for proofs and details. Professor Hertel had promised also to prepare for this volume a body of annotations which should justify the occasional departures of the text here given from the text of the editio major; should define the words which have not yet been given in the Sanskrit lexicons; should briefly explain passages that are difficult or that had been wrongly rendered in his own translation; and should make any needed comment on passages which had already evoked public discussion among the critics. The substance of much of the intended contents of these notes may be found in the numerous articles of Professor Hertel published during the last few years. Especially important in this connection are his articles in volume 25 of the Wiener Zeitschrift für die Kunde des Morgenlandes, Einzelbemerkungen zu den Texten des Pañcatantra, and in volumes 67 to 69 of the Zeitschrift der Deutschen Morgenländischen Gesellschaft, Indologische Analekta.

Hertel's book, Das Pañcatantra, appeared only a short time before the outbreak of the world-war. The teaching-staff of the Gymnasium at Döbeln was reduced in number and the work of those left at home was correspondingly heavier. In December, 1914, Professor Hertel, while on a sick-bed, received his orders to join the colors. His latest letter to me is dated Borna (Saxony), February 9, 1915. It explains the situation as to the promised Introduction and Notes, and says that he daily expects to be ordered to the front. If he returns to his wife and seven children and to the studies in which he has won such great distinction, he may yet prepare the Introduction and Notes so that they may be issued with the translation of the Tantrākhyāyika which I have undertaken.

The only course that lay open to me was to write the indispensable preliminary matter for this volume myself and to issue the volume [1] without the Introduction and Notes.

**Acknowledgments.** — To the printing-house of G. Kreysing of Leipzig a public acknowledgment of thanks is due. Dr. Hertel gave me the

[1] The printed sheets were shipped from Leipzig to Boston via Rotterdam, and by the Holland-America Line, about the middle of February, 1915, the beginning of the great activity of the German submarines. In spite of torpedoes and mines and other dangers of the long list given in the war-insurance policy, the sheets arrived safe in Boston about the first of April.

welcome assurance that the compositor and proof-reader did their work so well as to save him a great deal of trouble. And the general appearance of the text called forth from him expressions of satisfaction and delight. The larger Sanskrit type of this volume was brand-new when the work was begun, and it certainly yields a clear-cut and beautiful result. Scholars may well be grateful to good master-printers, and I wish for this printing-house, now in the second century of its history, a long continuance of its useful and honorable activity.

The Royal Society of Sciences at Göttingen deserves the thanks of Indianists for publishing Dr. Hertel's elaborate critical edition of this text or "editio major." The Society's edition is of course the indispensable basis for all further scientific investigation of the Panchatantra. And I make this statement explicitly and in Dr. Hertel's name, since he promised the Royal Society to do so when he received permission to issue this editio minor.

The price of the editio major is necessarily too large for the purse of the average student. It seemed, accordingly, that an inexpensive reprint or "editio minor" might prove very useful. For the permission to make this reprint, I here express on behalf of Dr. Hertel and myself our thanks to the Royal Society of Sciences at Göttingen.

Since the text of the Tantrākhyāyika is of great intrinsic importance by reason of its antiquity and its history and its contents and its suitability as a reading-book for students, it is hoped that this "editio minor" may find a hearty welcome and a wide circulation.

Charles R. Lanman

*Harvard University*
*August 9, 1915*

# TYPOGRAPHICAL DEVICES ETC. EXPLAINED

**Head-lines, page-numbers, line-numbers, indication of emboxments.** — The typographical devices of this volume are substantially the same as those employed in the Panchatantra of Pūrṇabhadra, Harvard Oriental Series, volume XI (see pages xxiv–xxv). The useful **head-lines** are self-explaining. The wording of the **titles** of the tales is so chosen as to accord so far as possible with the wording in volume XI. The **page-numbers** are given on the left-hand corner of each page, no matter whether it be odd or even, and **every third line** (not fifth) is numbered at the beginning (not the end). This is far more convenient than numbering every fifth line. And a number at the beginning of the line is much more easily caught by the eye than a number at the end, especially if the lines are not of just the same length. As to the **indication of emboxments**, I may quote my own words, as found at page xxv of volume XI, changing what needs to be changed:

**Emboxments indicated by vertical wavy lines.** — It is the Hindu habit to embox one story within another, and a third within the second, and so on. To follow any given story through these interruptions is not always easy for a master, and is most difficult for a beginner who reads slowly. In this edition the frame-story is distinguished by small type; emboxments of the first degree by large type; emboxments of the second degree by large type and one vertical wavy line at the right-hand margin; emboxments of the third degree by large type and two wavy lines. The general structure of the whole work appears also very plainly from the Table of Contents, in which I have tried to make the relation of frame-story to emboxments and of these to one another clear at a glance.[1]

Thus tale i of book II, Mouse and two monks, runs over 11 pages (62 to 72) with tale ii (Hulled grain for hulled grain) as an interruption, which interruption is itself interrupted by tale iii (Too greedy jackal). The text of tale i is indicated at a glance by the large type and the absence of wavy line. If you wish to read it all and continuously, you have only to skip the passages marked with wavy line or lines. The precise limits of tale ii (Hulled grain) are shown at a glance by the single wavy line which runs from $63^{15}$ to $64^{3}$ and from $65^{3}$ to $65^{22}$. And the limits of tale iii (Too greedy jackal) are made no less clear by the double wavy line which runs from $64^{5}$ to $65^{2}$.

The extreme simplicity and effectiveness of my device for showing the emboxments will, I hope, commend itself to all, and lead to its adoption in other texts of this kind.

[1] Incidentally, these Tables of Contents of volumes XIV and XI show very clearly the contrast between the Tantrākhyāyika and Pūrṇabhadra's text in the use of emboxments. The ancient text uses them very sparingly (the Too greedy jackal is the only emboxment of the third degree), while the modern text employs them with a most objectionable freedom and complexity. See page xii of volume XI.

**Vertical straight black-faced lines.** — These lines, in the right-hand margin, have been employed in cases where, on account of a lacuna in the manuscript *α*, it was necessary to put the reading of *β* into the text. The beginning or end of such a *β*-passage is indicated by an asterisk in case it does not coincide exactly with the beginning or end of a line. Thus on page 99, all of lines 1 to 5 is taken from *β*; while in lines 19 to 20 only the words *uktam* to *iti* are taken from *β*. So *eranda-* ($10^{17}$) to *bhidya-* inclusive ($11^{5}$). As page 99 shows, the use of straight line and wavy line together makes no confusion. — A series of asterisks indicates a lacuna. Thus at $61^{13}$ the missing speech of the crow is indicated by eight stars.

**Device for citing whole paragraphs of the frame-stories.** — In the editio major, Dr. Hertel has divided the frame-stories into paragraphs or Abschnitte (each paragraph being a unit as to substance or contents) and has marked them with letters and figures in the left-hand margin. These markings run in one sequence[1] from A1 to A308. Here A stands for Abschnitt. Those paragraph-divisions and numberings are repeated in this editio minor. Their usefulness is seen in Hertel's Synoptic Table in the Einleitung to his Übersetzung, pages 100 to 126. And Schulthess has adopted them in his translation of the Old Syriac version.

**Citation of tales and stanzas.** — Whole tales are cited by Roman numerals, a capital for the book or tantra and a lower-case numeral for the tale. Stanzas (or "strophes") are cited by an Arabic numeral. Thus I. viii means book I, tale viii, Blue jackal; while I. 8 means book I, stanza 8 (page $6^{1-4}$). But A8 means paragraph or Abschnitt 8 of the frame-story (page $4^{8-25}$). This method of citation is followed by Dr. Hertel in his translation of this text and elsewhere.

C.R.L.

[1] The passages of frame-story interpolated into *β*, and given in Appendix IV, pages 142 and 143, are marked by the bracketed numbering [A296] to [A302]. And certain *β*-passages given in Appendix II, page 138, which follow page 107, line 10, of this text, are marked A225ba and A225bb.

॥ कथामुखम् ॥

## ॥ ओँ स्वस्ति प्रजाभ्यः । ओँ नमो विघ्नहन्त्रे ॥

यत्रानिशं मधुकरीव मही निषण्णा
यत्पावनस्य मधुनः परमं निधानम् ।
तद्ब्रह्मणः सकलमण्डलपुण्डरीकं
पायादनन्तवपुषः फणमण्डलं वः ॥ १ ॥

मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।
चाणक्याय च महते नमो ऽस्तु नृपशास्त्रकर्तृभ्यः ॥ २ ॥

सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मापि ।
तन्त्रैः पञ्चभिरेतैश्चकार सुमनोहरं शास्त्रम् ॥ ३ ॥

A 1a ॥ तथानुश्रूयते ॥

दाक्षिणात्ये जनपदे मिहिलारोप्यं नाम नगरम् । तत्र च सकलार्थिजनमनोरथकल्पद्रुमः प्रवरनरपतिमुकुटमणिमरीचिनिचयरञ्जितचरणयुगलः कलासु पारंगमः सकलार्थशास्त्रविदमरशक्तिर्नाम राजा बभूव । तस्य च पुत्रास्त्रयः परमदुर्मेधसो वसुशक्तिरुग्रशक्तिरनेकशक्तिश्चेतिनामानो बभूवुः । तानर्थशास्त्रं प्रति जडानालोक्य राजा सचिवानाहूय संप्रधारितवान् । ज्ञातमेव भवद्भिः । यथा ममैते पुत्राः परमदुर्मेधसः । तदेषां बुद्धिप्रबोधनं केनोपायेनानुष्ठीयत इति । तत्र केचिदाहुः । देव । द्वादशभिर्वर्षैः किल व्याकरणं ज्ञायत इति । तत्र केचिदाहुः । न वा ज्ञायते च । ततो धर्मार्थकामशास्त्राणि ज्ञेयानि । तदेतदतिगहनं धीमतामपि । किं पुनर्मन्दबुद्धीनाम् ।

A 1b तदत्र वसुनि नीतिशास्त्रविद्विष्णुशर्मा नाम ब्राह्मणो ऽनेकशास्त्रविख्यातकीर्तिरस्ति । तमाहूय तस्मै समर्प्यन्तां कुमारा इति । एवमनुष्ठिते सचिवाहूतः स राजान द्विजातिमार्गोचितेनाशीर्वादेनाभिनन्द्योपाविशत् । सुखोपविष्टं तमाह राजा ।

ब्रह्मन् । मदनुग्रहार्थमेतान्कुमारान्दुर्मेधसस्त्वमर्थशास्त्रं प्रत्यनन्यसमान्कर्तुमर्हसि । अर्थमात्रया च त्वां संमानयिष्यामीति । एवमभिहितवति पार्थिवे विष्णुशर्मापि तं राजानं विज्ञापितवान् ।

कार्यं यथा वदति यः स तथा प्रकारो
युक्तं न युक्तमिदमित्यविचार्यमेतत् ।
उद्दिश्य किं वदति को ऽनुशयो ऽस्य को ऽय-
मेवार्थतत्त्वमिति तत्प्रभुणा विचार्यम् ॥ ४ ॥

A 2 तत्किं बहुना । श्रूयतामयं मम वचनसिंहनादः । नाहमर्थलिप्सुरित्येवं ब्रवीमि । न च ममाशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियस्य कश्चिदर्थोपभोगकालः । किंतु त्वद्धितार्थं बुद्धिपूर्वको ऽयमारम्भः । तल्लिख्यतामद्यतनो दिवसः । यद्यहं न षण्मासाभ्यन्तरात्तव पुत्रान्नीतिशास्त्रं प्रत्यनन्यसमान्करोमि । ततो ममार्हसि मार्गसंदर्शनेन हस्तशतमपक्रामयितुमिति ।

एतामसंभाव्यां ब्राह्मणस्य प्रतिज्ञां श्रुत्वा ससचिवो राजा परं विस्मयमगमदाह च । यस्तावदर्थमेतं संपन्नमिति मां पुनर्विज्ञापयिष्यति । तस्याहं पुष्टमनुग्रहं करिष्यामि । इत्युक्त्वा सबहुमानं तस्मै समर्पितवान्कुमारान् । तेनापि च सूपायमालोच्य शास्त्राणि लिखितानि पञ्च तन्त्राणि । न सो ऽस्ति तिरश्चां मनुष्याणां वा । यं यथायोगं स्वार्थसिद्धये न निवेशितवान् ॥

॥ कथामुखमेतत्समाप्तम् ॥

## ॥ मित्रभेदं नाम प्रथमं तन्त्रम् ॥

A 3 अत इदमारभ्यते मित्रभेदं नाम प्रथमं तन्त्रम् । यस्यायमाद्यः श्लोकः ।

वर्धमानो महान्स्नेहः सिंहगोवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ १ ॥

A 4 ॥ तद्यथानुश्रूयते ॥

दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तत्र च धर्मोपार्जितवृत्तिर्वर्धमानको नाम श्रेष्ठिपुत्रो बभूव । तस्य कदाचिच्चित्तमुत्पन्नम् । प्रभूते ऽपि वित्ते ऽर्थवृद्धिः करणीयेति । उक्तं च ।

अलब्धमर्थं लिप्सेत लब्धं रक्षेदवेक्षया ।
रक्षितं वर्धयेच्चैनं वृद्धं पात्रेषु निक्षिपेत् ॥ २ ॥

A 5 अलब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्धिनी वर्धितस्य तीर्थप्रतिपादनी चेति लोकयात्रा । अरक्ष्यमाणो ह्यर्थो बह्वपद्रवतया सद्यो विनश्यति । अवर्धमानो ऽप्यञ्जनादिक्षयदर्शनाच्छनैरप्युपयुज्यमानः क्षीयते । अनुपयुज्यमानः प्रयोजनोत्पत्तौ तुल्यो ऽप्राप्तेनेति । अतः प्राप्तस्य रक्षणविवर्धनोपयोगाः कार्याः । उक्तं च ।

उपार्जितानामर्थानां त्याग एव हि रक्षणम् ।
तडाकोदरसंस्थानां परीवाह इवाम्भसाम् ॥ ३ ॥

A 6 इति । एवं संप्रधार्य मथुरागामि भाण्डमुपसंगृह्य शुभे तिथौ गुरुजनानुज्ञातस्तस्मान्नगराद्विनिर्गतः । तस्य च द्वौ वृषभौ वोढारावग्रधुरायां नन्दकसंजीवकनामानावभूताम् । गच्छतस्तस्य कस्मिंश्चिद्देशे दूरावरूढगिरिनिर्झरस्खलितवारिजनितकर्दमैकचरणवैकल्याच्छकटस्य चातिभारादभिहतः कथमपि दैववशात्संजीवको युगभङ्गं कृत्वा निषसाद । तं च दृष्ट्वा वर्धमानकः सार्थवाहः परं विषादमगमत् । त्र्यहं चोदीक्ष्य यदासौ नावैकल्यतां लभते स्म । तदा तस्य रक्षिपुरुषान्दत्त्वा शेषसार्थसंरक्षणार्थं बह्वपायं वनमिति मत्वा यथाभिलषितं दिगन्तरं प्रायात् । अन्यदा त्वात्मभयात्तत्परै रक्षिपुरुषैरागत्य तस्य मृषोक्तम् । स्वामिन् । मृतो ऽसौ संजीवक इति । अस्माभिश्चाग्न्यादिना सत्कृतः । इति । एतच्छ्रुत्वा वर्धमानः सार्थवाहश्च कृत-

ज्ञतया प्रेतकृत्यानि तस्य कृत्वा गतः । अथासावपि संजीवक आयुःशेषतया सलिलपृषतैर्वायुनाप्यायितशरीरः कथंचिदुत्थाय यमुनाकच्छमुपश्लिष्टः । तत्र च मरकतसदृशानि शष्पाग्राणि भक्षयन्कतिपयैरहोभिर्हरवृषभ इव पीनककुद्धारी बलवान्संवृत्तः । प्रत्यहं च वल्मीकशिखराणि शृङ्गाग्रघट्टितैरुल्लिखन्नर्दंश्च प्रतितिष्ठति स्म ।

A 7 अथ कदाचित्तस्मिन्वने सर्वमृगपरिवृतः पिङ्गलको नाम सिंह उदकग्रहणार्थं यमुनाकच्छमवतितीर्षुः संजीवकस्य महान्तं गर्जितशब्दमशृणोत् । तं च श्रुत्वातीवक्षुभितहृदय आकारमाच्छाद्य मण्डलवटप्रदेशे चतुर्मण्डलावस्थानेनावस्थितः ।

A 8 चतुर्म*ण्डलावस्थानं कृत्वा । सिंहः सिंहानुयायी काकरवः किंवृत्त इति मण्डलानि । तत्र च सर्वेष्वेव ग्रामनगरपत्तनाधिष्ठानखेटखर्वटोद्यानाग्रहारकाननवनस्थानेष्वेक एव सिंहः स्थानीयो भवति । कतिपयसिंहानुयायिनस्तन्त्रधाराः । काकरववर्गा मध्यमवर्गाः । किंवृत्ता एवान्यस्थानवासिनः । अथ पिङ्गलकः सामान्यजनपरिवारः स्वजनसुहृज्जनच्छत्त्रचामरव्यजनवाहनविलासविस्तारविरहितमकृत्त्रिमसाहसैकान्तरसदर्पोन्नतमभग्नमानमदोत्सेकमसहमानस्वयंग्राहि निरङ्कुशदर्शनैश्वर्यमनभिज्ञमितरजनसेवितानां कृपणवचसां सामर्षरोषसंरम्भगर्भसंस्थानकामानां पुरुषाणामगम्यमनुत्क्षिप्ताञ्जलिपुटमदीनमभीतमकृतचाटुकर्मोद्यमव्यवसायगुरुपौरुषाभिमानावष्टम्भभारभासुरमनन्यसेवि निःसङ्गमनात्मंभरि परोपकारत्यक्तपुरुषकारफलमपरिभूतप्रार्थितमतुच्छमपगतदुर्गप्रतिसंस्कारवृत्तमगणितायव्ययविलोपमनन्यायत्तमौद्धत्योपार्जितप्रतापातिशयमषाड्गुण्यसंप्रधारणमप्रहरणाभरणं विरुद्धग्राममपरोक्षवृत्तमनाशङ्कनीयमनपेक्षितपरकलत्रमकापुरुषगम्यम् *अप्रार्थितमन्त्रच्छलपार्ष्णिग्राहासाराक्रन्दम्* अनिन्द्यमविघट्टिताशिक्षितस्तुतिप्रयोगमनिच्छाविघाति परिजननिरपेक्षलब्धग्रासनिवाससौहित्यं बकुसत्त्वाश्रमैकान्तविहारिणां त्यक्तकामानुशयरसानां वीतरागाणां यावदुपभोग्यमपाङ्गधीरावलोकिताभ्यवहारजलोपकरणं वनान्तरे निःसाध्वसमुच्चैः शिरो वहन्राजत्वमनुभवन्नास्ते । अपि च ।

एकाकिनि वनवासिन्यराजलक्ष्मण्यनीतिशास्त्रज्ञे ।
सत्त्वोच्छ्रिते मृगपतौ राजेति गिरः परिणमन्ति ॥ ४ ॥

A 9 तस्य च करटकदमनकनामानौ द्वौ शृगालौ मन्त्रिपुत्रावास्ताम् । तौ च परस्परं मन्त्रयतः । तदत्र दमनको ऽब्रवीत् । भद्र करटक । अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थमभिप्रवृत्तमतिः किं निमित्तमिहावस्थितः । सो ऽब्रवीत् । किमनेन व्यापारेणावयोरिति । उक्तं च ।

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स नरो निहतः शेते कीलोत्पाटीव मर्कटः ॥ ५ ॥

A 10 दमनक आह । कथं चैतत् । सो ऽब्रवीत् ।

॥ कथा १ ॥

अस्ति कश्चिद्वणिजकः । नगरसमीपे तेन देवतायतनं क्रियते । तत्र ये कर्मकाराः स्थपत्यादयः । ते मध्याह्नवेलायामाहारनिमित्तं भोजनमण्डपमनुप्रविष्टाः । अकस्माच्चानुषङ्गिकं देवगृहे वानरयूथमागतम् । अथ तत्रैकस्य शिल्पिनो ऽर्धस्फोटितकाष्ठस्तम्भो ऽर्जुनमयः खदिरकीलकेन मध्ये यन्त्रनिखातेनावष्टब्धो ऽवतिष्ठते । तत्र कदाचिद्वानरयूथो गिरिशिखरादवतीर्य स्वेच्छया तरुशिखरप्रासादशृङ्गदारुनिचयेषु प्रक्रीडितुमारब्धः । एकस्तु तत्रासन्नविनाशश्चापलादुपविश्य स्तम्भे यन्त्रचारमुद्दिश्येदमाह । केनायमस्थाने कीलको निखातः । इति पाणिभ्यामेव संगृह्योत्पाटयितुमारब्धः । स्थानाच्चलिते कीले यद्वृत्तम् । तदनाख्येयम् । एवमेव भवता ज्ञातमिति ।

A 11 अतो ऽहं ब्रवीमि । अव्यापारः प्राज्ञैः परिहर्तव्यः । इति । पुनश्चाब्रवीत् । आवयोस्तावद्भक्षितशेषमाहारनिर्वर्तनमस्त्येव । करटकं दमनक आह । कथमाहारमात्रार्थी केवलं भवान् । सर्वस्तावत्प्रधानसेवां कुरुते विशेषार्थी । साधु चेदमुच्यते ।

सुहृदामुपकारकारणा-
द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधै-
र्जठरं को न बिभर्ति केवलम् ॥ ६ ॥

अपि च ।

स्वल्पं स्नायुवसावसेकमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधः शान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतो ऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ ७ ॥

अन्यच्च ।

A 14 तदेनमद्यैव प्रज्ञाप्रभावेनात्मीकरिष्यामि । करटकः । भद्र । अनभिज्ञो भवान्सेवाधर्मस्य । कथमात्मीकरिष्यसि । दमनकः । कथमहं सेवानभिज्ञः । ननु मयैष सकलो ऽनुजीविधर्मो विज्ञातः । अपि च ।

को ऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ १७ ॥

A 15 करटकः । कदाचिदसावनुचितप्रवेशाद्भवन्तमवमन्यते । दमनकः । अस्त्येतत् । तथापि ।

आसन्नमेव नृपतिर्भजते मनुष्यं
प्रज्ञाविहीनमकुलीनमसंस्तुतं वा ।
प्रायेण भूमिपतयः प्रमदा लताश्च
यः पार्श्वतो वसति तं परिवेष्टयन्ति ॥ १८ ॥

कोपप्रसादवस्तूनि विचिन्वन्तः समीपगाः ।
आरोहन्ति शनैर्भृत्या धूर्तं तमपि पार्थिवम् ॥ १९ ॥

A 16 करटकः । अथ भवान्किं तत्र वक्ष्यति । दमनकः । भद्र ।

उत्तरादुत्तरं वाक्यमुत्तरादेव जायते ।
सुवृष्टिगुणसंपन्नाद्बीजाद्बीजमिवापरम् ॥ २० ॥

अपि च ।

अपायसंदर्शनजां विपत्ति-
मुपायसंदर्शनजां च सिद्धिम् ।
मेधाविनो नीतिविदः प्रयुक्तां
पुरः स्फुरन्तीमिव दर्शयन्ति ॥ २१ ॥

A 17 न चाहमप्राप्तकालं वक्ष्यामि ।

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुद्ध्यवज्ञानमवमानं च केवलम् ॥ २२ ॥

साधु चेदमुच्यते ।

नादेशे नाकाले नापरिपक्वेन्द्रिये न गुणहीने ।
कथयति कथां हि सुकथो न ततो ऽस्य कथा भवति वन्ध्या ॥ २३ ॥

अपि च ।

कल्पयति येन वृत्तिं सदसि च सद्भिः प्रशस्यते येन ।
स गुणस्तेन गुणवता विवर्धनीयश्च रक्ष्यश्च ॥ २४ ॥

A 18 करटकः । दुरारोहाश्च नरपतयः पर्वता इवाजस्रं प्रकृतिविषमा रन्ध्रान्वेषिणश्छलग्राहिणश्च । कुतः ।

क्षितिभृन्मर्यादावान्गम्भीरो रत्नवान्सलावण्यः ।
जलधिरिव दुरवगाहो विदुषां ग्राहाकुलो नृपतिः ॥ २५ ॥

अपि च ।

भोगिनः कञ्चुकासक्ताः क्रूराः कुटिलगामिनः ।
फणिनो मन्त्रसाध्याश्च राजानो भुजगा इव ॥ २६ ॥

A 19 दमनकः । एवमेतत् । तथापि ।

राजानमपि सेवन्ते विषमप्युपभुञ्जते ।
रमन्ते च सह स्त्रीभिः कुशलाः खलु मानवाः ॥ २७ ॥

अपि च ।

यस्य यस्य हि यो भावस्तेन तेन हि तं नरम् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ २८ ॥

येन येन हि राजन्तं पश्येत पुरुषं क्वचित् ।
तेन तस्य गुणा ग्राह्या विदुषा भूतिमिच्छता ॥ २९ ॥

A 20 करटकः । शिवास्ते पन्थानः । यथाभिप्रेतमनुष्ठीयतामिति ।

A 21 तथा चानुष्ठिते सो ऽपि तमामन्त्र्य शनैः सिंहान्तिकमगमत् । तत्र गुहाद्वारं प्रविशन्तं दमनकं दृष्ट्वा पिङ्गलको द्वाःस्थानब्रवीत् । मा विचार्यताम् । अपसार्यन्तां वेत्राणि । अयमस्माकं दमनकश्चिरन्तनो मन्त्रिपुत्रः । अव्याहतप्रवेशो ह्येष द्वितीयमण्डलभागिति । अथोपश्लिष्य दमनकः प्रणम्य पिङ्गलकनिर्दिष्टे चासने निषसाद । स च तस्य नखकुलिशालंकृतं दक्षिणपाणिमुपरि दत्त्वा मानपुरःसरमब्रवीत् । अपि भवतः शिवम् । चिरदृष्टो ऽसीति । दमनकः । न किंचिन्मया । स्वामिन् । पादानां प्रयोजनमस्तीति । तथाप्यवश्यं प्राप्तकालं वक्तव्यम् । यस्मान्न केनचिद्राज्ञामुपयोगकारणं नास्ति । उक्तं च ।

दन्तस्य वा निष्कुषणेन राज-
न्कर्णस्य कण्डूयनकेन वापि ।
तृणेन कार्यं भवतीश्वराणां
किमङ्ग वाग्घस्तवता जनेन ॥ ३० ॥

अपि च ।

कदर्थितस्यापि हि धैर्यवृत्ते-
र्न शक्यते धैर्यगुणं प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्ने-
र्नाधः शिखा यान्ति कदाचिदेव ॥ ३१ ॥

यदि कोकिलमेचकाञ्जनाभो
भुजगः पादतलाहतो ऽप्यकाले ।
न करोत्यगुणं कयापि बुद्ध्या
किमसौ नष्टविषो ऽभिनन्दितव्यः ॥ ३२ ॥

तत् । राजन् ।

विशेषज्ञो भव सदा राष्ट्रस्य च जनस्य च ।
तदन्तरज्ञानमात्रप्रतिबद्धा हि संपदः ॥ ३३ ॥

साधु चेदमुच्यते ।

कार्षकः सर्वबीजानि समालोड्य प्रवापयेत् ।
उत्पन्ने बीजसद्भावं त्वङ्कुरेण विभावयेत् ॥ ३४ ॥

A 22 तद्विशेषज्ञेन स्वामिना भवितव्यम् । ज्ञात्वा च ।

स्थानेष्वेव नियोक्तव्या भृत्याश्चाभरणानि च ।
न हि चूडामणिः पादे प्रभवामीति बध्यते ॥ ३५ ॥
कनकभूषणसंग्रहणोचितो
यदि मणिस्त्रपुणि प्रतिबध्यते ।
न स विरौति न चापि न शोभते
भवति योजयितुर्वचनीयता ॥ ३६ ॥

अपि च ।

बुद्धिमाननुरक्तो ऽयमिहोभयमयं जडः ।
इति भृत्यविचारज्ञो भृत्यैरापूर्यते नृपः ॥ ३७ ॥

अन्यथा ।

असमैः समीयमानः समैश्च परिहीयमाणसत्कारः ।
अधुरि विनियुज्यमानस्त्रिभिरर्थपतिं त्यजति भृत्यः ॥ ३८ ॥

A 23 अन्यच्च । देव । पादानां वयमन्वयागता भृत्या आपत्स्वप्यनुगामिनः । यतो नास्माकमन्या गतिरस्ति । तदमात्यानां वचनम् ।

सव्यदक्षिणयोर्यत्र विशेषो नास्ति हस्तयोः ।
कस्तत्र क्षणमप्यार्यो विद्यमानगतिर्वसेत् ॥ ३९ ॥

अपि च ।

वाजिवारणलोहानां काष्ठपाषाणवाससाम् ।
नारीपुरुषतोयानामन्तरं महदन्तरम् ॥ ४० ॥

विशेषवचनेन तूच्यते ।

पाषाणभारसहस्रं यः स्कन्धेनाभिवाञ्छति हि वोढुम् ।
श्रममेति विनाशं वा सो ऽबुद्धिस्तद्वहन्नेव ॥ ४१ ॥
अङ्गुष्ठोदरमात्रं विशेषवित्प्राप्य पद्मरागमणिम् ।
सुखसंवाह्यमनुत्तरमर्थं किं तेन नाप्नोति ॥ ४२ ॥

A 24 तेन हि स्वामिगुणादेव भृत्यविशेषः । कथम् ।

अश्वः शास्त्रं शस्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ ४३ ॥

A 25 यच्च सृगालो ऽयमिति मत्वा ममोपर्यनादरः क्रियते । तदप्ययुक्तम् । यतः ।

विष्णुः सूकररूपेण मृगरूपी महानृषिः ।
षण्मुखश्छागरूपेण पूज्यते किं न साधुभिः ॥ ४४ ॥

अपि च ।

नैतदेकान्ततः सिद्धं गृहजातश्चिरन्तनः ।
भृतः श्रेयस्करो नित्यममात्यो निभृतस्त्विति ॥ ४५ ॥

तथा हि ।

मूषको गृहजातो ऽपि हन्तव्यो ऽनुपकारकः ।
उपप्रदानैर्मार्जारो हितकृत्प्रार्थ्यते ऽन्यतः ॥ ४६ ॥
एरण्डभिण्डार्कनलैः प्रभूतैरपि संभृतैः ।
दारुकृत्यं यथा नास्ति तथा नाज्ञैः प्रयोजनम् ॥ ४७ ॥
किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन्यथावज्ज्ञातुमर्हसि ॥ ४८ ॥

अपि च ।

अविज्ञानाद्राज्ञो भवति मतिहीनः परिजन-
स्ततस्तत्प्राधान्याद्भवति न समीपे बुधजनः ।
बुधैस्त्यक्ते राज्ये भवति हि न नीतिर्गुणवती ।
प्रनष्टायां नीतौ सनृपमवशं नश्यति कुलम् ॥ ४९ ॥

A 26 पिङ्गलक आह । भद्र । मैवं वोचः । चिरन्तनस्त्वमस्माकं मन्त्रिपुत्रः । दमनकः । देव । किंचिद्वक्तव्यमस्ति । पिङ्गलकः । ब्रूहि । यत्ते विवक्षितम् । दमनकः । उदकग्रहणाभिप्रवृत्तमतिः स्वामी । तत्किं निमित्तमिहावस्थितः । पिङ्गलक आत्मप्रच्छादनार्थम् । दमनक । न किंचित्कारणमस्ति । दमनकः । देव । यदि नाख्येयं नाम । तन्नेच्छामि । अथ पिङ्गलकस्तच्छ्रुत्वा चिन्तयामास । योग्यो ऽयम् । आख्येयमस्मै । आह च । दमनक । श्रूयतामयं शब्दः । स आह । स्वामिन् । व्यक्तं श्रुतः शब्दः । पिङ्गलक आह । भद्र । अस्माद्वनादपक्रामितुमिच्छामि । यत्कारणम् । इदमपूर्वं

सत्त्वमिह प्रविष्टम् । यस्यायं निर्घोषः श्रूयते । शब्दानुरूपेण सत्त्वेन च भवितव्यम् । सत्त्वानुरूपेण च पराक्रमेण । यश्च परस्य भयं प्रयुङ्क्ते । स एव भयं न वेत्ति । तत्सर्वथा नेह स्थातव्यम् । दमनक आह । किं शब्दमात्रादेव भयमुपागतः स्वमी । अपि च ।

अम्भसा भिद्यते सेतुस्तथा मन्त्रो ऽप्यरक्षितः ।
पैशुन्याद्भिद्यते स्नेहो वाग्भिर्भिद्येत कातरः ॥ ५० ॥

A 27 तन्न युक्तं स्वामिनः शब्दमात्रादेव पूर्वोपार्जितमिदं वनं परित्यक्तुम् । इह ह्यनेकप्रकाराः शब्दाः श्रूयन्ते । तत्र ये शब्दा एव केवलाः । न तेभ्यो भयं विद्यते । तद्यथा । मेघस्तनितवीणावेणुपणवमृदङ्गघण्टाकवाटयन्त्रशकटादीनाम् । न तेभ्यः शङ्कितव्यम् । उक्तं च ।

पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।
अनुप्रविश्य विज्ञातं यावद्दारु च चर्म च ॥ ५१ ॥

A 28 पिङ्गलकः । कथमेतत् । दमनकः ।

## ॥ कथा २ ॥

अस्ति । कश्चिद्गोमायुराहारविच्छेदात्क्षुत्क्षामकण्ठ इतश्चेतः परिभ्रमन्नुभयसैन्यस्यायोधनभूमिमपश्यत् । तत्र च महान्तं शब्दमशृणोत् । तद्भयसंक्षुभितहृदयः किमिदम् । विनष्टो ऽस्मि । कस्यायं शब्दः । क्व वा कीदृशो वैष शब्दः । इति चिन्तयता दृष्टा गिरिशिखराकारा भेरी । तां च दृष्ट्वाचिन्तयत् । किमयं शब्दो ऽस्याः स्वाभाविकः । उत परप्रेरित इति । अथ सा यदा वायुप्रेरितैर्वृक्षाग्रैः स्पृश्यते । तदा शब्दं करोति । अन्यदा न । इति तूष्णीमास्ते । स तु तस्याः सारासारतां ज्ञातुं संनिकर्षमुपश्लिष्टः । स्वयं च कौतुकादुभयोर्मुखयोरताडयत् । अचिन्तयच्च । गम्यं चैतद्भक्ष्यं च मम । इत्यवधार्यैकदंष्ट्रया क्षुधाविष्टः पाटितवान् । परुषत्वाच्च चर्मणः कथमपि न दंष्ट्राभङ्गमवाप्तवान् । प्रतिबद्धाशश्च पुनरप्यचिन्तयत् । नूनमस्या अन्तर्भक्ष्यं भविष्यति । इत्यध्यवस्य भेर्या मुखं

विदार्यान्तः प्रविष्टः । तस्मिन्नपि न किंचिदासादितवान् । प्रतिनिवर्तितुमशक्तो ऽन्तर्लीनार्धकायो विहस्याब्रवीत् । पूर्वमेव मया ज्ञातमिति ।

A 29 अतो ऽहं ब्रवीमि । शब्दमात्रादेव क्षोभो न कार्यः । किंतु यस्यायं शब्दः । तत्समीपमहं गच्छामि । पिङ्गलकः । किं भवांस्तदन्तिकमुत्सहते गन्तुम् । बाढमित्यसावाह ।

A 30 गते तस्मिन्पिङ्गलकश्चिन्तयामास । न शोभनमापतितम् । कदाचिदयमुभयोर्भेदकः स्यात् । उक्तं च संमानितविमानिताः । प्रत्याख्याताः । क्रुद्धाः । लुब्धाः । परिक्षीणाः । स्वयमुपगताश्छद्मना प्रवारयितुं शक्याः । अत्यन्तास्वाकाराभिन्यस्ताः । समाहूय पराजिताः । तुल्यकारिणः शिल्पोपकारे विमानिताः । प्रवासोपतप्ताः । तुल्यैरन्तर्हिताः । प्रत्यपहृतमानाः । तथात्याहृतव्यवहाराः । तत्कुलीनाशंसवः समवाये च स्वधर्मान्न चलन्ति । समन्ताच्चोपधाक्षत्यास्त इति । सो ऽयं प्रत्यपहृतमानो ऽहमिति मत्वा ममैवोपरि कदाचिद्विकारं भजेत । अथवासामर्थ्याद्बलवता प्रत्यनुबद्धो ममैव मध्येनागच्छेत् । तथाप्यहं विनष्ट एव । तत्सर्वथास्मात्स्थानादन्यत्स्थानमाश्रयामि । यावदस्य मया विज्ञातं चिकीर्षितमिति ।

A 31 दमनको ऽपि संजीवकेन सहोपचारपरिचयादितश्चेतश्चात्मानं प्रदर्श्य पिङ्गलकान्तिकं प्रायात् । पिङ्गलको ऽपि पूर्वस्थानमाश्रितवानाकारप्रच्छादनार्थम् । अन्यथायं दमनको मंस्यते । भीरुश्चायं भीरुपरिवारश्चेति । अथ दमनको ऽब्रवीत् । दृष्टं तन्मया । स्वामिन् । पिङ्गलकः । यथावद्दृष्टम् । दमनकः । यथावदिति । पिङ्गलकः । न यथावद्दृष्टम् । यत्कारणम् । भवानप्रधानः । शक्तिहीनत्वाच्च तवोपरि न कश्चित्तस्य प्रतिबन्धः । यस्मात् ।

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वशः ।
समुच्छ्रितानेव तरून्प्रबाधते
महान्महत्स्वेव करोति विक्रियाम् ॥ ५२ ॥

अपि च ।

गण्डस्थले मदकलो मदवारिलुब्ध-
मत्तभ्रमद्भ्रमरपादतलाहतो ऽपि ।
कोपं न गच्छति नितान्तबलो ऽपि नाग-
स्तुल्यं बलेन बलिनः प्रति कोपयन्ति ॥ ५३ ॥

A 32 दमनकः । मया तावत्पूर्वमेवाभिज्ञातम् । यथैवं स्वामी वक्ष्यति । स्वामिन् । न ते विदितम् । एतावानसाविति । तत्किं बहुना । तमेवेह पादानां सकाशमानयामि । तच्च श्रुत्वा पिङ्गलकः प्रीतिहर्षविकसितनयनवदनकमलः परां तुष्टिमुपगतः । दमनको ऽपि पुनर्गत्वा संजीवकं साधिक्षेपमाह । एह्येहि । दुष्ट । स्वामी पिङ्गलकस्ते व्याहरति । किं निर्भीर्भूत्वा पुनः पुनर्व्यर्थं नर्दसि । तच्च श्रुत्वा संजीवको ऽब्रवीत् । भद्र । क एष पिङ्गलको नाम । यो मां व्याहरति । ततः सविस्मयं विहस्य दमनकस्तमाह । कथं स्वामिनं पिङ्गलकमपि न जानासि । फलेन ज्ञास्यसीत्यब्रवीत्सामर्षम् । नन्वयं मृगराड्सर्वमृगपरिवृतो मण्डलवटाभ्याशे मानोन्नतचित्तः स्वामी पिङ्गलकस्तिष्ठति ।

तच्छ्रुत्वा संजीवको गतासुमिवात्मानं मन्यमानः परं विषादमगमदाह च । यदि मयावश्यमेवागन्तव्यम् । तदभयप्रदानेन मे प्रसादः क्रियतामिति ।

दमनकस्तथा नामेति प्रतिपद्य सिंहसकाशं गत्वा निवेद्य तमर्थं लब्धानुज्ञो यथा प्रतिपन्नस्तमुपनीतवान्सिंहसकाशं संजीवकम् । स च तस्य पीनवृत्तायतं नखकुलिशाभरणालंकृतं दक्षिणं पाणिमुपरि दत्त्वा मानपुरःसरमब्रवीत् । अपि भवतः शिवम् । कुतस्त्वमस्मिन्विजने वन इति । एवं पृष्टो यथापूर्ववृत्तान्तमात्मनः सार्थवाहवर्धमानकाद्वियोगमाख्यातवान् । तच्च श्रुत्वा पिङ्गलकेनाभिहितः । वयस्य । न भेतव्यम् । मद्भुजपरिरक्षिते ऽस्मिन्वने यथेप्सितमुष्यताम् । अपि च । भवता मत्समीपविहारिणाजस्रं भवितव्यम् । यत्कारणम् । बह्वपायमिदं वनमनेकसत्त्वसंकटत्वादिति ।

A 33 एवमुक्त्वा सर्वमृगपरिवृतो यमुनाकच्छमवतीर्य प्रकाममुदकपानं कृत्वा स्वैरप्रचारं पुनस्तस्मिन्नेव वने शिबिरमनुप्रविष्टः ।

A 34 एवं तयोः पिङ्गलकसंजीवकयोः प्रतिदिनं प्रीतिपूर्वकं परस्परं कालो ऽत्यवर्तत । अनेकशास्त्रार्थप्रणिहितबुद्धित्वाच्च संजीवकेनानभिज्ञो ऽपि वन्यत्वात्पिङ्गलको ऽल्पेनैव कालेन धीमान्कृतः । पञ्चानां चाहाराणां कवलकग्राहे चैतनिकाचैतनिकस्पर्धावलोकनादिजातानां व्यवहारे ऽवस्थापितो ऽन्यश्च । पिङ्गलकसंजीवकावेव रहस्यानि मन्त्रयेते । शेषो मृगजनः सर्व एवैकमण्डलीकृतः ।

A 35 सिंहपराक्रमव्यापादनाहारविरहाच्च केवलं शक्तिहीनत्वाद्दमनककरटकावेव क्षुधा बाध्येते । तदत्र दमनको ऽब्रवीत् । भद्र करटक । विनष्टावावाम् । यत्कारणम् । आत्मना कृतो ऽयं दोषः संजीवकं पिङ्गलकसकाशमानयता । साधु चेदमुच्यते ।

जम्बुको हुडुयुद्धेन वयं चाषाढभूतिना ।
दूतिका तन्त्रवायेन त्रयो ऽनर्थाः स्वयं कृताः ॥ ५४ ॥

A 36 दमनकः करटकमाह ।

॥ कथा ३ ॥

a अस्ति कस्मिंश्चित्प्रदेशे परिव्राड्देवशर्मा नाम । तस्यानेकसाधूपपादितसूक्ष्मवासोविशेषोपचयान्महत्यर्थमात्रा संवृत्ता । स च न कस्यचिदपि विश्वासं याति । अथ कदाचिदाषाढभूतिर्नाम परवित्तापहृत्कथमियमर्थमात्रास्य मया परिहर्तव्येति वितर्क्यावलगनरूपेणोपगम्य तत्कालेन च विश्वासमनयत् । अथ कदाचिदसौ परिव्राजकस्तीर्थयात्राप्रसङ्गे तेनाषाढभूतिना सह गन्तुमारब्धः । तत्र च कस्मिंश्चिद्वनोद्देशे नदीतीरे मात्रान्तिक आषाढभूतिमवस्थाप्यैकान्तमुदकग्रहणार्थं गतः ।

b अपश्यच्च महन्मेषयुद्धम् । अनवरतयुद्धशक्तिसंपन्नयोश्च तयोः शृङ्गपञ्जरान्तरोद्भूतमसृग्बहु भूमौ निपतितं दृष्ट्वाशाप्रतिबद्धचित्तः पिशितलोभतया गोमायुस्तज्जिघृक्षुः संपीडितोद्घातात्सद्यः पञ्चत्वमगमत् ।

a अथ परिव्राड्विस्मयाविष्टो ऽब्रवीत् । जम्बुको ऽडुयुद्धेनेति । कृतशौचश्चागतस्तमुद्देशमाषाढभूतिमपि गृहीतार्थमात्रासारमपक्रान्तं नापश्यद्देवशर्मा । केवलं त्वपविद्धत्रिदण्डकाष्ठकुण्डिकापरिस्रावणकूर्चकाद्यपश्यत् । अचिन्तयच्च । क्वासावाषाढभूतिः । नूनमहं तेन मुषितः । इत्युक्तवान् । वयं चाषाढभूतिनेति ।

c अथासौ कपालशकलग्रन्थिकावशेषः कंचिद्ग्राममस्तं गच्छति रवौ प्रविष्टः । प्रविशन्नेकान्तवासिनं तन्त्रवायमपश्यत् । आवासकं च प्रार्थितवान् । तेनापि तस्यात्मीयगृहैकदेशे स्थानं निर्दिश्य

भार्याभिहिता । यावदहं नगरं गत्वा सुहृत्समेतो मधुपानं कृत्वागच्छामि । तावदप्रमत्तया गृहे त्वया भाव्यम् । इत्यादिश्य गतः । अथ तस्य भार्या पुंश्चली दूतिकासंचोदिता शरीरसंस्कारं कृत्वा परिचितसकाशं गन्तुमारब्धा । अभिमुखश्चास्या भर्ता मदविलोपासमाप्ताक्षरवचनः परिस्खलितगतिरवस्रस्तवासाः समायातः । तं च दृष्ट्वा प्रत्युत्पन्नमतिः कौशलादाकल्पमपनीय पूर्वप्रकृतमेव वेषमास्थाय पादशौचशयनाद्यारम्भमकरोत् । कौलिकस्तु गृहं प्रविश्य निद्रावशमगमत् । सुप्तप्रतिबुद्धश्चासौ तामाक्रोष्टुमारब्धः । पुंश्चलि । त्वत्कृतमपचारं सुहृदो मे वर्णयन्ति । भवतु । पुष्टं निग्रहं करिष्यामीति । असावपि निर्मर्यादा प्रतिवचनं दातुमारब्धा । पुनरपि चासौ प्रतिबुद्धस्तां मध्यस्थूणायां रज्ज्वा सुप्रतिबद्धां कृत्वा प्रसुप्तः । दूतिकैतां पुनर्गमनाय प्रचोदितवती । सा तूत्पन्नप्रतिभा दूतिकामात्मीयदर्शनसंविधानेन बद्ध्वा कामुकसकाशं ययौ । असावपि प्रतिबुद्धस्तथैव तामाक्रोष्टुमारब्धः । दूतिका तु शङ्कितहृदयानुचितवाक्योदाहरणभीता न किंचिदुक्तवती । तन्त्रवायस्तु शाठ्यादियं न किंचिन्ममोत्तरं प्रयच्छतीत्युत्थाय तस्यास्तीक्ष्णशस्त्रेण नासिकां छित्त्वाब्रवीत् । तिष्ठैवंलक्षणा । कस्त्वामधुना वार्त्तां पृच्छति । इत्युक्त्वा निद्रावशमुपागमत् । आगता च सा तन्त्रवायी दूतिकामपृच्छत् । का ते वार्त्ता । किमयं प्रतिबुद्धो ऽभिहितवान् । कथय कथयेति । दूतिका तु कृतनिग्रहा नासिकां दर्शयन्ती सामर्षमाह । शिवास्ते सर्वा वार्त्ताः । मुञ्च । गच्छामीति । तथा त्वनुष्ठिते नासिकामादायापक्रान्ता । तन्त्रवाय्यपि कृतकबद्धमात्मानं तथैवाकरोत् । कौलिकस्तु यथापूर्वमेव प्रतिबुद्धस्तामाक्रोशत् । असावपि दुष्टा बहु धृष्टतरमाह । धिग्घतो ऽसि । को मां निरागसं

असावपि सुपरिहृष्टहृदयः पाद्यादिपुरःसरां तस्य पूजां कर्तुमारब्धवान्भोजने च प्रार्थितवान् ।

तस्य च नातिदूरे नदी । तत्र स्नानाभ्युद्यतस्य च तस्य स्वीयं पुत्रमेकमामलकस्नानशाटिकासमेतं पृष्ठतः प्रेषितवान् । असावपि प्रत्यागच्छन्दारकमन्यस्मिन्मित्रगृहे सुगुप्तं कृत्वा प्रविष्टः । अथ भोजनसमये सार्थवाहो दारकमदृष्ट्वा समाकुलमनाः शङ्कितहृदयश्च तमपृच्छत् । क्वासौ दारकस्तवानुपदप्रेषितः । इह न प्रविष्ट इति । अथ सो ऽब्रवीत् । श्येनेनापहृत इति । तच्छ्रुत्वा परमाविग्नो निर्दयीभूतश्च तं बाहौ गृहीत्वा धर्मस्थानं नीतवान् । आह च । परित्रायध्वम् । अनेन मे दारकः क्वापि गोपित इति । पृष्टश्चासौ प्राड्विवाकैः । किमेतत् । कथ्यतामिति । स विहस्याब्रवीत् । श्येनेनापहृत इति । ततस्तैर्विस्मितमनोभिरभिहितः । कथं श्येनो दारकमपहरिष्यतीति । धर्माधिकृतैस्तथ्यं पृच्छ्यमानो ऽब्रवीत् । किमत्र चित्रम् । यत्र तुला लोहसहस्रस्यास्य गेहे मदीया मूषकैर्भक्षिता । तत्र कथं दारकः श्येनेन नापह्रियत इति । तच्च श्रुत्वा प्रतिपादितवन्तस्ते प्राड्विवाकाः परस्परस्य तत्तुलातद्दारकदानमिति ।

A 118 अतो ऽहं ब्रवीमि । तुलां लोहसहस्रस्येति । तत्किं पशोरिव निःसंज्ञस्योपदिष्टेन । श्रुतवति प्रज्ञा जले तैलं रक्ते विषं सत्सु संगतं प्रेम प्रियासु गुह्यमविनीतेषु विसर्पितं कीर्तिमतां च लोके साधुजन्म । कस्मात् ।

न जातिधर्मः पुरुषस्य साधुता
चरित्रमूलानि यशांसि देहिनाम् ।
अकीर्तिरापच्छतजालकर्षणी
कृतघ्नमन्वेति परत्र चेह च ॥ १७६ ॥

A 119 यच्चाजस्रं परार्ध्यगुणनिन्दापरो ऽसि । तदपि त्वां प्रकृतिराकर्षति । कथम् ।

प्रायेणेह कुलान्वितं कुकुलजाः स्त्रीवल्लभं दुर्भगा
दातारं कृपणा ऋजूननृजवस्तेजस्विनं पूतराः ।

इयं त्वभिन्नमर्यादैः स्वनुशिष्टैः कृतात्मभिः ।
सर्वसहैरुपायज्ञैरमूढैरेव धार्यते ॥ १७ ॥

A 207 b तत्सर्वथा युद्धमेव न श्रेयस्करमिति । कस्मात् । ज्यायसा विरोधो हस्तिना पादयुद्धमिवैकान्तविनाशाय ।

A 208 मेघवर्ण आह । तात । कथय । किं निष्पन्नम् । सो ऽब्रवीत् । भद्र । संप्रधार्यतामेतत् । उक्तं च ।

नयो हि मन्त्रस्य मुखं तदाश्रय-
प्रयोजनैनेह तु कर्म मन्त्रिणाम् ।
समुद्धृतो दूतनियोग इष्यते
क्रियानुयोगः परतो ऽनुजीविनाम् ॥ १८ ॥

विशेषलब्धप्रतिभा प्रगल्भता
क्रियासु सम्यक्प्रणिधानमात्मनः ।
परात्मनोश्चान्तरनिश्चयज्ञता
महीपतेर्मन्त्रकरस्य जायते ॥ १९ ॥

या प्राणपणिता देहमूल्येनापि न लभ्यते ।
सा श्रीर्मन्त्रविदां वैरमन्यनाहृतापि धावति ॥ २० ॥

क्रमेण यः शास्त्रविदो हितैषिणः
क्रियाविभागे सुहृदो न पृच्छति ।
* * * * * * * * *
* * * * * * * * * * ॥ २१ ॥

* * * * * * * * *
* * * * * * * * * * ।
महोदधिं नद्य इवाभिपूर्णं
तं संपदः सत्पुरुषं भजन्ते ॥ २२ ॥

शूराः सर्वोपधायित्वाद्बुद्धिमन्तो विचक्षणाः ।
सहायाः स्युर्नृपत्वं हि सत्सहायनिबन्धनम् ॥ २३ ॥

सहायबन्धना ह्यर्थाः सहायाश्चार्थबन्धनाः ।
अन्योन्यबन्धनावेतौ विनान्योन्यं न सिध्यतः ॥ २४ ॥

देशं बलं कालमुपायमायु-
र्विचिन्त्य यः प्रारभते हि कृत्यम् ।
स वेत्ति नीतिं स परैर्न वञ्च्यते
मनोरथस्तस्य न याति वन्ध्यताम् ॥ २५ ॥

